धावकः, त्रि, (धावति शीघ्रं गच्छतीति । धाव + ण्वुल् ।) धावनकर्त्ता । शीघ्रगमनकर्त्ता । धाउ-ड़िया इति भाषा । धावधातोर्ण्वकप्रत्ययेन निष्पन्नः ॥ (यथा, गोः रामायणे ।२।३२।२२ ।
"संवाहकाः सलिलदाः पुरतो धावकाश्च ये ।
तेषां निष्कसहस्रं त्वं प्रत्यर्थमुपकल्पय ॥")

धावनं, क्ली, (धाव + भावे ल्युट् ।) गमनम् । (यथा, राजतरङ्गिण्याम् । १ । ११४ ।
"ग्रामे ग्रामे स्थितैरश्वैर्धावनं प्रतिषिद्धवान् ॥")
शुद्धिः । इति मेदिनी । ने, ७६ ॥ (यथा, सुश्रुते चिकित्सितस्थाने । २२ ।
"पटोलनिम्बपत्राभ्यां कषायाश्चात्र धावने ॥"
"पाकं गते व्रणे वापि गम्भीरे सरुजेऽथवा ।
सरन्ध्रे शोधनं कार्य्यं धावनन्तु भिषग्वरैः ॥"
इति हारीते चिकित्सितस्थाने ३५ अध्यायः ॥)

धावनिः, स्त्री, (धाव + बाहुलकात् अनिः ।) पृश्नि-पर्णी । इत्यमरः ।२।४।६३॥ (पर्य्यायोऽस्या यथा,
"पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घिपर्ण्यपि ।
क्रोष्टुविन्ना सिंहपुच्छी कलशी धावनिर्गुहा ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
कण्टकारी । इति राजनिर्घण्टः ॥)

धावनिका, स्त्री, (धावनिरिव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् । यद्वा, स्वार्थे कन् ।) कण्टकारिका । इति रत्नमाला ॥

धावनी, स्त्री, (धावनि + कृदिकारादिति वा ङीष् ।) पृश्निपर्णी । इति मेदिनी । ने, ७६ ॥ कण्टकारी । धातकी । इति राजनिर्घण्टः ॥

धावितः, त्रि, (धाव + क्तः ।) गतः । (यथा, कथासरित्सागरे । ३ । ५२ ।
"एवमस्त्विति तौ मूढौ धावितौ सोऽपि पादुके ।
अध्यास्योदपतद्व्योम गृहीत्वा यष्टिभाजने ॥")
मार्ज्जितः ॥

धासः, [स्] पुं, (दधाति पृथिवीमिति । धा + "वहिहाधाञ्भ्यश्छन्दसि ।" उणां । ४ । २२० । इति असुन् तस्य सुट् च ।) पर्ब्बतः । इति वैदिकप्रयोगः ॥

धि, श धृतौ । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-अनिट् ।) श, धियति । इति दुर्गादासः ॥

धिक्, अ. निर्भर्त्सनम् । निन्दा । इत्यमरः । ३ । ३ । २३६ ॥ (यथा, विष्णुपुराणे । १ । १५।३५।
"धिङ्मां धिङ्मामतीवेत्थं निनिन्दात्मान-मात्मना ॥")

धिक्कारः, पुं, (धिक् इत्यस्य कारः करणम् ।) धिक् । तत्पर्य्यायः । गौकारः २ अवहेलम् ३ अमाननम् ४ क्षेपः ५ निकारः ६ अनादरः ७। इति शब्दरत्नावली ॥ (यथा, भागवते ।४।१४।१३।
"लोकधिक्कारसन्दग्धं दहिष्यामः स्वतेजसा ॥")

धिक्कृतः, त्रि, (धिक् + कृ + कर्म्मणि क्तः ।) निर्भर्त्सितः । असत्करणादिना धिगित्यस्य करणं धिक्कारो निन्दा धिगितः धिक्कृतः धिक् त्वां इति भर्त्सितो धिक्कृत इति यावत् । इति भरतः ॥ तत्पर्य्यायः । अपध्वस्तः २ । इति प्राणिवर्गे अमरः । ३ । १ । ३९ ॥ (यथा, भागवते । ७ । ८ । ५३ ।
"वयं किम्पुरुषास्त्वन्तु महापुरुष ईश्वरः ।
अयं कुपुरुषो नष्टो धिक्कृतः साधुभिः सदा ॥")
निन्दितमात्रम् । कृतधिक्कारस्य प्राणिवर्गोक्तस्य पर्य्यायान्तरमिदम् अप्राणिविषयार्थम् । धिगस्तु त्वां इति कृतः शब्दितो धिक्कृतः । इति भरतः ॥ तत्पर्य्यायः । अवगीतः २ । इति विशेष्यनिघ्नवर्गे अमरः । ३ । १ । ६४ ॥

धिकक्रिया, स्त्री, (धिगित्युच्चारणमेव क्रिया ।) निन्दा । इति हेमचन्द्रः । २ । १८५ ॥

धिक्ष, ङ सन्दीपे । क्लेशे । जीवे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) तृतीयस्वरी । ङ, धिक्षते वह्निः सन्दीप्यते इत्यर्थः । जनः क्लिश्यति जीवतीति वा अर्थः । इति दुर्गादासः ॥

धिग्वणः, पुं, वर्णसङ्करविशेषः । तस्य चर्म्मकार्य्यं वृत्तिः । स तु ब्राह्मणादायोगव्यां जातः । इति मनुः ॥

धियाम्पतिः, पुं, (धियां बुद्धीनां पतिः । अलुक् समासः ।) पूर्ब्बजिनविशेषः । मञ्जुघोष इति ख्यातः । इति त्रिकाण्डशेषः । आत्मा । अत एव धियाम्पतिरिति प्रयोगदर्शनात् ॥

धिव, इ न प्रीतौ । गतौ । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) प्रीतिरिह प्रीतीकरणम् । इ, धिन्व्यते । न, धिनोति हर्षेण हिरण्य-रेतसमिति किराते । गतिः केचिन्न मन्यते । इति दुर्गादासः ॥

धिष, र लि रवे । इति कविकल्पद्रुमः ॥ (ह्वां-परं-अकं-सेट् ।) र, वैदिकः । लि, दिधेष्टि । रवः शब्दः । इति दुर्गादासः ॥

धिषणः, पुं, (धृष्णोति प्रागल्भ्यं ददातीति । धृष् + "धृषेर्धिष च संज्ञायाम् ।" उणां २ । ८२ । इति क्युः ।) बृहस्पतिः । इत्यमरः । १ । ३ । २४ ॥

धिषणा, स्त्री, (धृष्णोत्यनयेति । धृष प्रागल्भ्ये + क्युः । धिषादेशश्च ।) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, ऋग्वेदे । ३ । ३२ । १४ ।
"विवेष यन्मा धिषणा जजान स्तवैः पुरा पार्य्या-दिन्द्रमह्नः ॥"
स्तुतिः । यथा, ऋग्वेदे । ८ । १५ । ७ ।
"तव त्यदिन्द्रियं बृहत्तव शुष्ममुत क्रतुम् ।
वज्रं शिशाति धिषणा वरेण्यम् ॥"
"धिषणा स्तुतिः ।" इति तद्भाष्ये सायनः ॥
वाक् । यथा, ऋग्वेदे । ३ । ४९ । ४ ।
"क्षपां वस्ता जनिता सूर्य्यस्य विभक्ता भागं भागं धिषणेव वाजम् ॥"
"धिषणेव । यथाऽज्ञानां वाक् अस्येदमिति विभागं करोति तद्वत् ।" इति तद्भाष्ये सायनः ॥
प्रस्तरः । यथा, ऋग्वेदे । ९ । ५९ । २ ।
"पवस्व धिषणाभ्यः ।"
"किञ्च धिषणाभ्यो ग्रावभ्यः पवस्व चर ॥" इति तद्भाष्ये सायनः ॥
धारयित्री । द्यावापृथिव्योः द्विवचनान्तः । यथा, ऋग्वेदे । ३ । ४९ । १ ।
"यं सुक्रतुं धिषणे विभ्वतष्टं घनं वृत्राणां जन-यन्त देवाः ॥"
"धिषणे देवमनुष्यादीनां धारयित्र्यौ । यद्वा प्रगल्भ्ये समर्थे स्वाश्रितान् रक्षितुमिति धिषणे द्यावापृथिव्यौ ॥" इति तद्भाष्ये सायनः ॥*॥
हविर्द्धानस्य पत्नी । यथा, मात्स्ये । ४ । ४५ ।
"हविर्द्धानात् षड़ाग्नेयी धिषणा जनयत् सुतान् ।
प्राचीनवर्हिषं साङ्गं यमं शुक्रं बलं शुभम् ॥"
क्ली । स्थानम् । यथा, भागवते । ३ । १६ । ३२ ।
"तदा विकुण्ठधिषणात् तयोर्निपतमानयोः ।
हाहाकारो महानासीद्विमानाग्र्येषु पुत्रकाः ॥"
"विकुण्ठस्य धिषणात् स्थानात् ।" इति तट्टीकायां श्रीधरस्वामी ॥)

धिष्टं, क्ली, (धिष्ण्य + निपातनात् णस्य टः ।) स्थानम् । गृहम् । नक्षत्रम् । अग्निः । इत्यमरः । ३ । ३ । १५४ ॥ शक्तिः । इति मेदिनी ॥

धिष्ण्यः, पुं, (धृष्णोति प्रगल्भो भवतीति । धृष + ण्यः । निपातनात् साधुः ।) अग्निः । शुक्राचार्य्यः । इति पुंस्काण्डेऽमरदत्तः ॥

धिष्ण्यं, क्ली, (धृष्णोति प्रगल्भो भवतीति । धृष् + "सानसिवर्णसिपर्णसीति ।" उणां । ४ । १०७ । इति ण्यप्रत्ययः निपातनात् ऋकारस्य च इकारः । स्थानम् । (यथा, भागवते ।२।१।३० ।
"द्यौरक्षिणी चक्षुरभूत् पतङ्गः
पक्ष्माणि विष्णोरहनी उभे च ।
तद्भ्रूविजृम्भः परमेष्ठिधिष्ण्य-
मापोऽस्य तालू रस एव जिह्वा ॥"
"परमेष्ठिधिष्ण्यं ब्रह्मपदम् ॥" इति तट्टीकायां स्वामी ॥ गृहम् । (यथा, महाभारते ।१७।३।१०।
"स्वर्गे लोके श्ववतां नास्ति धिष्ण्य-मिष्टापूर्त्तं क्रोधवशा हरन्ति ॥")
नक्षत्रम् । (यथा, सूर्य्यसिद्धान्ते । ११ । २१ ।
"सार्पैन्द्रपौष्णधिष्ण्यानामन्त्याः पादाः भस-न्धयः ॥")
अग्निः । इत्यमरः । ३।३।१५४ ॥ (यथा अथर्व्व-वेदे । २ । ३५ । १ ।
"ये भक्षयन्तो न वसून्यानृधुर्यानग्नयो अन्वतप्यन्त धिष्ण्याः ॥")
शक्तिः । इति मेदिनी । ये, ३४ ॥ (उल्का-भेदः । यथा, बृहत्संहितायाम् । ३३ । १ ।
"दिवि भुक्तशुभफलानां
पततां रूपाणि यानि तान्युल्काः ।
धिष्ण्योल्काशनिविद्युत्तारा
इति पञ्चधा भिन्नाः ॥"
प्राणाभिमानी देवः । यथा, ऋग्वेदे ।३।२२।३।
"अग्ने ! दिवो अर्णमच्छा जिगास्यच्छा देवाँ ऊचिषे धिष्ण्या ये ॥"
"धियं बुद्ध्युपहितं देहं उष्णन्ति उष्णीकुर्व्व-न्तीति धिष्ण्याः प्राणाभिमानिनो देवाः ।" इति तद्भाष्ये सायनः ॥)